# ६ उपनिवेशवादः नगराणि च

## (कस्याश्चित् राजसी-राजधान्याः कथाः)

### औपनिवेशक-शासने नगराणां किम् अभवत् ?

भवन्तः दृष्टवन्तः यत् ब्रिटिशसत्तायाः स्थापनायाः पश्चात् ग्राम्यजीवनं कथं परिवर्तितम् । तस्मिन् समये नगरेषु किं भवति स्म ? एतस्य प्रश्नस्य उत्तरम् एतस्मिन् तथ्ये आश्रितम् अस्ति यत् वयं कीदृशानां नगराणाम् उपनगराणां च विषये चर्चयामः इति । मदुरैसदृशानां मन्दिर-नगराणाम् इतिहासः ढाका-सदृशेभ्यः उत्पादक-नगरेभ्यः सूरतसदृश-पोतस्थानकेभ्यः अथवा युगपत् विविधकार्याणि कुर्वद्भ्यः उपनगरेभ्यः सर्वथा पृथक् अस्ति इति वयं प्राप्स्यामः ।

पश्चिमदेशानाम् अधिकेषु भागेषु आधुनिकनगराणि औद्योगीकरणेन सह एव दृष्टिपथम् आगतानि आसन् । ब्रिटेने लीड्स-मैनचेस्टरसदृशानि नगराणि एकोनविंशति-विंशतिशताब्दयोः तीव्रतया विकसितानि, यतो हि तत्र अनेके जनाः वृत्तिं भवनम् अन्यसौविध्यानि च प्राप्स्यामः इति आशया नगराणि प्रति आगच्छन्ति स्म । परन्तु एकोनविंशतिशताब्दे भारतीयनगराणां पश्चिमयूरोपीयनगराणाम् इव तीव्रतया विकासः न अभवत् । एतादृशं कस्मात् कारणात् अभवत् ?



**चित्रम्-१** मछलीपट्नम् इत्यस्य स्थानस्य किञ्चित् दृश्यम्,१६७२ ।

मछलीपट्नम् इति सप्तदशशताब्दे महत्त्वपूर्ण-पोतस्थानक-रूपेन विकसितम् । अष्टादशशताब्दस्य अन्ते यदा वाणिज्यं बम्बयी-मद्रास-कलकत्तानगराणां नूतनब्रिटिश-पोतस्थानकेषु केन्द्रितम् अभवत् तदा तस्य मछलीपट्नमस्य महत्त्वं शनैः शनैः न्यून्यभवत् ।

अष्टादश शताब्दस्य अन्ते कलकत्ता-नगरस्य बम्बयी-महानगरस्य मद्रासस्य च महत्त्वं प्रेजिडेंसी इति नगराणां रूपेण तीव्रतया वर्धते स्म । एतानि नगराणि भारते ब्रिटिशसत्तायाः केन्द्रभूतानि आसन् । तस्मिन् काले अन्यानि नगराणि दुर्बलानि जायमानानि आसन्। विशिष्टवस्तूनाम् उत्पादकाणि बहूनि नगराणि एतस्मात् कारणात् अविकसितानि जातानि यतोहि तत्र येषां वस्तूनां निर्माणं भवति स्म तेषाम् अभ्यर्थना न्यूना जाता आसीत् । यदा वाणिज्यं नूतनक्षेत्रेषु केन्द्रितम् अभवत् तदा पुरातनानि वाणिज्यिक-केन्द्राणि पोतस्थानकानि च पुरातनावस्थायां न अतिष्ठन्। अनेन एव प्रकारेण आङ्ग्लीयैः स्थानीयाः राजानः पराजिताः तथा च शासनस्य नूतनकेन्द्राणि स्थापितानि। तस्मिन् काले क्षेत्रीयसत्तायाः पुरातनकेन्द्राणि अपि ध्वसितानि । एषा प्रक्रिया प्रायः विनगरीकरणम् (विशहरीकरण) इति उच्यते । मछलीपट्नम-सुरत-श्रीरंगपट्सदृशानां नगराणाम् एकोनविंशतिशताब्दे आधिक्येन विनगरीकरणम् अभवत्। विंशतिशताब्दस्य आरम्भे केवलम् एकादशप्रतिशतं जनाः एव नगरेषु निवसन्ति स्म ।

**प्रेजिडेंसी-** (आङ्ग्लशासन-मुख्यालयाः) शासनस्य सौविध्यस्य दृष्ट्या औपनिवेशिकभारतं त्रिषु प्रेजिडेंसी (बम्बई-मद्रास-बङ्गालेषु) इत्येतेषु विभक्तम् आसीत्। एतानि त्रीणि प्रेजिडेंसी इत्येतानि सूरत-मद्रास-कलकत्तानगरेषु स्थितेषु ईस्ट-इण्डियासंस्थायाः "उद्योगगाराणि (वाणिज्यिक-चतुष्पीठानि) च मनसि निधाय निर्मितानि आसन्।



**चित्रम् -२-** अष्टादश-शताब्दे बम्बयि-महानगरस्य पोतस्थानकम्।

यदा ईस्ट-इण्डियासंस्था पश्चिमभारतस्य बम्बयीमहानगरस्य मुख्यपत्तनरूपेण प्रयोगम् आरभत तदा बम्बयीनगरस्य विस्तारः आरब्धः।

ऐतिहासिक-राजस-नगरं देहली एकोनविंशतिशताब्दे कश्चित् धूलिबहुलम् उपनगरम् आसीत् । परन्तु द्वादशाधिकैकोन-विंशति-तमे वर्षे (1992) ब्रिटिशभारतस्य राजधानी यदा एतत् देहलीनगरं जातं, ततः परं पुनः एतत् विकासपथम् आरूढवत् । आगच्छन्तु, देहलीविषयकां कथां दृष्ट्वा अवगच्छन्तु यत् औपनिवेशिक-शासनकाले अत्र किं चलति स्म ?

## नवदेहल्याः प्राक् अन्याः कियत्यः देहल्यः आसन् ?

भवन्तः देहलीम् आधुनिकभारतस्य राजधानीरूपेण पश्यन्ति । किं भवन्तः जानान्ति यत् एतत् नगरं सहस्राधिकवर्षाणि यावत् राजधानीरूपेण आसीत् । एतस्मिन् अवधौ अत्र न्यूनाधिकानि परिवर्तनानि अपि जातानि सन्ति । यमुनानद्याः वामतटे प्रायः षष्ठी-वर्ग-मील-परिमिते लघुक्षेत्रफले न्यूनातिन्यूनं चतुर्दश-राजधान्यः पृथक् पृथक् काले स्थापितानि । आधुनिक-देहली-राज्ये भ्रमणावसरे एतासां सर्वासां राजधानीनाम्

**नगरीयकरणम्** (शहरीकरण) – एतादृशी प्रक्रिया यत्र आधिक्येन जनाः नगराणि उपनगराणि च गत्वा वसन्ति।



**चित्रम्-३-** एकोनविंशतिशताब्दस्य मध्यकाले शाहजहांनाबादस्य एकं चित्रम्, दि-इलेस्ट्रेटेड-लन्दन-न्यूज, १६जनवरी१८५८। भवन्तः वामपक्षे रक्तदुर्गं द्रष्टुं शक्नुवन्ति। नगरं परिवेष्टयन्तीः भित्तीः सावधानं पश्यन्तु। मध्ये चादनीचौकस्य मुख्यमार्गः दृश्यते। पश्यन्तु यमुना नदी रक्तदुर्गम् अनुप्रवहति। अधुना एतस्याः यमुनानद्याः मार्गः किञ्चित् परिवर्तितम् अस्ति। यत्र नौका तटं प्रति वर्धते अधुना एतत् स्थानं दरियागंज इति उच्यते।(दरिया इत्यस्य अर्थः नदी, गंज इत्यस्य च अर्थः विपणिः इति भवति)।

अवशेषान् द्रष्टुं शक्नुमः। एतासु द्वादशत्रयोदश-शताब्द्योः मध्यकाले स्थापितानि राजधानी-नगराणि सर्वेषु महत्त्वपूर्णानि आसन्।

एतासु सर्वासु राजधानीषु सुन्दरतमा राजधानी शाहजहांनृपस्य आसीत्। शाहजहांना-बादस्य स्थापना नवत्रिंशदधिक-षोडश-शततमे वर्षे (१६३९) अभवत्। एतस्याः राजधान्याः अन्तः एकः दुर्गः नातिदूरे च एकं नगरं च आसीत्। लोहित-पाषाण-निर्मिते रक्तदुर्गे प्रासादपरिसरः निर्मितः आसीत्। एतस्य प्रासादस्य पश्चिमभागे चतुर्दशद्वारयुक्तम् एकं पुरातनगरम् आसीत्। चान्दनी-चौकस्थले फैजमहाहट्टस्य च मुख्यमार्गाः एतावन्तः प्रथिताः आसन् यत् ततः राजयात्राः सरलतया निर्गन्तुं शक्नुवन्ति स्म। चान्दनीचौक इति मध्ये कुल्यः आसीत्।

सघननिवासैः द्वादशाधिकमहाहट्टैः च परिवृत्तः जामायवनमन्दिरं भारतस्य विशालतमेषु भव्ययवनमन्दिरेषु च कश्चित् आसीत्। तस्मिन् काले सम्पूर्णे नगरे एतस्य यवनमन्दिरात् उन्नतस्थानं नासीत्।

शाहजहांवर्यस्य काले देहली सूफी-संस्कृतेः अपि प्रमुख-केन्द्रभूता आसीत्। अत्र यवनसतां मन्दिरम् (दरगाह) यवन-भिक्षु-विहारः (खानकाह)-यवनमन्दिरम् (इदगाह) इत्यादीनि आसन्। महान्ति चतुष्पीठानि, तिर्यक्-विथयः, शान्तस्य कुल-दे-सेक इत्यस्य (एतादृशः मार्गः यः एकस्मिन् स्थाने गत्वा पिहितः भवति।) तथा च जलधाराणाम् उपरि देहलीस्थजनाः गर्वम् अनुभवन्ति स्म। प्रायः एतस्मात् कारणात् एव मीर-तकी-मीरः अवदत् आसीत् "देहल्याः राजमार्गाः केवलं सामान्यमार्गाः एव न सन्ति ते तु कस्यचित् चित्रकारस्य चित्रावल्याः पृष्ठानि इव सन्ति।"

**यवन-सतां मन्दिरम्** (दरगाह इति) - यवन-सन्त-समाधि-स्थलम्

**भिक्षुविहारः** - (खानकाहः इति) – यात्रिभ्यः विश्रामगृहं तथा च एतादृशं स्थानं यत्र जनाः आध्यात्मिक-विषयेषु चर्चयन्ति, महात्मानः यत्र आर्शीवचोभिः जनान् अनुगृह्णन्ति अथवा नृत्यसङ्गीतादि-कार्य-क्रमैः आनन्दम् अनुभवन्ति।

**यवनमन्दिरम्** (ईदगाह इति ) – मुस्लिम-जनानां प्रकट-प्रार्थना-स्थलम्, यत्र सर्वजनिक-रूपेण प्रार्थनाः उत्सवाः च भवन्ति।

**कुल-दे-सेक इति** - एतादृशः मार्गः यः एकस्मिन् स्थाने गत्वा पिहितः भवति अथवा निश्चितस्थानं प्राप्य विरम्यमाणः मार्गः

परन्तु इदम् अपि आदर्शनगरं नासीत्। अत्रत्याः सुखसौविध्यानि विलासिता चापि केषाञ्चित् जनानां भाग्ये एव आसन्। सम्पन्नस्य विपन्नस्य च मध्ये महत् पार्थक्यम् आसीत्। प्रासादानां समीपे एव निर्धनानाम् असंख्यकानि मृण्मयानि गृहाणि भवन्ति स्म । कवितापाठः नृत्यसङ्गीतादीनि च केवलं पुरुषाणां मनोरञ्जनाय साधनभूतानि भवन्ति स्म। उत्सवेषु यात्रादिषु जनसम्मर्देषु च यदा कदा विरोध-प्रदर्शनादिकम् अपि भवति स्म।





**चित्रम्-५-** देहल्यां निजामुद्दीन-औलियायाः समाधि-स्थलम् (दरगाह इति)।

## नवदेहल्याः निर्माणम्

१८०३ तमवर्षे आङ्ग्लीयाः मराठाजनान् पराजित्य देहल्याः उपरि नियन्त्रणं स्थापितवन्तः। यतो हि ब्रिटिशभारतस्य राजधानी कलकत्तानगरम् आसीत् अतः मुगलशासकः रक्तदुर्गस्थे प्रासादे उषितुं मुक्तः आसीत्। अद्य अस्माकं पुरतः यत् आधुनिक-नगरम् अस्ति एतस्य देहलीनगरस्य निर्माणम् एकादशाधिकैकोन-विंशति-शत-तमे वर्षे(१९११) तदा आरब्धं यदा देहली ब्रिटिशभारतस्य राजधानी जाता।

### एकस्य अतीतस्य ध्वंसनम्

१८५७तमवर्षात् पूर्वं देहल्याः स्थितिः अन्येषाम् औपनिवेशिकनगराणाम् अपेक्षया अतीव पृथक् आसीत् । मद्रास-बम्बयी-कलकत्तामहानगरेषु भारतीयानाम् आङ्ग्लीयानां च वसतयः पृथक् पृथक् आसन्। भारतीयाः "कृष्णक्षेत्रेषु आङ्ग्लीयाः च शोभमानेषु श्वेतक्षेत्रेषु निवसन्ति स्म। देहल्याम् उपर्युक्तव्यवस्था नासीत्। विशेषतया

स्रोतः -१

**"देहली किञ्चित् नगरम् आसीत्**
**(आलम में इंतखाब)....."**

नवत्रिंशदधिकाधिक-सप्त-दशशते तमे वर्षे (१७३९) देहली नादिरशाहद्वारा नाशिता लुण्डिता च आसीत् । अष्टदशशताब्दस्य देहलीनगरस्य पतनस्य विषये अष्टदशशताब्दस्य उर्दुकविः मीर-तकी-मीरः सदुःखं वर्णयति –

"देहली किञ्चित् नगरम् आसीत् यत् विश्वे विशिष्टम् अग्रगण्यं भव्यं च आसीत् (आलम में इंतखाब)....."

वयं तस्य एव नष्टस्य नगरस्य
वास्तव्याः स्मः,
(अहं तस्य एव नष्टस्य देहलीनगरस्य निवासी अस्मि यत् कस्मिंश्चित् काले संसारस्य भव्यतमेषु नगरेषु आसीत्)।

**पुष्पोत्सवः** (गुलफरोशान) – पुष्पाणाम् उत्सवः।

**पुनर्जागरणम्** – एतस्य शब्दस्य शाब्दिकः अर्थः भवति कलायाः ज्ञानस्य च पुनर्जन्म इति। अयं शब्दः एतादृशस्य कालस्य कृते प्रयुज्यते यदा व्यापकतया रचनात्मकाः गतिविधयः भवन्ति।

एकोन-विंशति-शताब्दस्य पूर्वार्द्धे देहल्याः आङ्ग्लीयाः अपि पुरातन-नगरस्य अन्तः धनाढ्यभारतीयैः सह एव निवसन्ति स्म। ते अपि उर्दूसंस्कृतेः अथवा फारसीसंस्कृतेः च कवितापाठेन आनन्दिताः भवन्ति स्म स्थानीयोत्सवेषु च अपि भागं गृह्णन्ति स्म।

चतुर्विंशत्यधिकाष्टादशशततमे वर्षे (१८२४) देहलीमहाविद्यालयस्य स्थापना अभवत् यस्य आरम्भः अष्टादशशताब्दे यवनविद्यालयरूपेण (मदरसे) अभवत्। अनया संस्थया विज्ञानस्य मानवशास्त्रस्य च क्षेत्रे कस्यचित् नूतनयुगस्य सूत्रपातः कृतः। अत्र मुख्यतया उर्दूभाषया कार्यं भवति स्म। अनेके जनाः वदन्ति यत् त्रिंशदधिकाष्टादशशततमवर्षात् (१८३०) सप्तपञ्चाशदधिकाष्टा-दश-शत-तम-वर्षावधिः (१८५७) देहल्याः पुनर्जागरणकालावधिः आसीत् इति।

सप्तपञ्चाशदधिकाष्टादशशत-तम-वर्षावधेः (१८५७) पश्चात् इदं सर्वं परिवर्तितम्। तस्मिन् वर्षे यः विद्रोहः अभवत् तदा विद्रोहिभिः बहादुरशाहजफरः विद्रोहस्य नेतृत्वाय साग्रहं निवेदितः। मासचतुष्टयं यावत् देहली विद्रोहिणां नियन्त्रणे आसीत्।



**चित्रम् ६** ब्रिटिशसैन्यसमूहाः प्रतिकारभावनया देहल्याः राजमार्गेषु विद्रोहिणः हन्ति।

यदा आङ्ग्लीयैः पुनः नगरस्य उपरि नियन्त्रणं प्राप्तं तदा आङ्ग्लीयैः प्रतिकार-भावनया लुण्ठनकार्यम् आरब्धम्। प्रसिद्धः कविः(शायर) गालिब-उदासः मनसा एताः घटनाः पश्यति स्म। १८५७ तमवर्षे देहल्याः समूलनाशः तेन एतैः शब्दैः अभिव्यक्तः "यदा कुपिताः सिंहाः (आङ्ग्लीयाः) नगरं प्रविष्टवन्तः तदा ते असहायजनान् मारितवन्तः... गृहाणि ज्वलितवन्तः। न जाने तदा कियन्तः महिलाः कियत्यः महिलाः सामान्यनागरिकाः विशिष्टाः च जनाः द्वारत्रयस्य माध्यमेन देहलीतः पलायितवन्तः। ते लघुकुटुम्बरूपेण नगरात् बहिः यवनालयान् आश्रितवन्तः"। अग्रिमविद्रोहान् रोद्धुं आङ्ग्लीयाः बहादुरशाहजफरं देशात् बहिः निष्कासितवन्तः। आङ्ग्लीयैः सः बर्मादेशं (वर्तमानम्यांमारं) प्रेषितः, तस्य शासनं नाशितम्, अनेके प्रासादाः निपातिताः,उद्यानानि पिहितानि तथा च तेषां स्थाने स्वसैन्यस्थानि (बैरक इति) निर्मितानि।

आङ्ग्लीयाः देहल्याः मुगलातीतं सर्वथा विस्मारयितुम् इच्छन्ति स्म। दुर्गं परितः सम्पूर्णक्षेत्रं स्वच्छीकृतम्। तत्रत्यानि उद्यानानि क्रीडाक्षेत्राणि यवनालयाः च

स्रोतः -२

**"कदाचित् एतस्य नाम्नः अपि नगरम् अभवत्"**

देहल्याः जायमानैः परिवर्तनैः गालिबः गभीररूपेण दुःखी आसीत्। सः देहल्याः अतीतस्य विषये अलिखत् –

> किं लिखानि ? देहल्याः जीवनं तु दुर्गेण चान्दनी-चौकेन यमुनासेतौ क्रीडकाणां समूहैः(चौकडियां) वार्षिकेण पुष्पोत्सवेन (गुलफरोशान) च शोभते। यदि उपयुक्तानि एतानि सर्वाणि वस्तूनि अत्र देहल्यां न सन्ति तर्हि देहली कथं स्थिरा भवितुं शक्नोति? आम्, हिन्दुस्ताने कदाचित् एतत् नामधेयं नगरम् अवश्यम् एव आसीत्।



नष्टीकृताः (तैः मन्दिराणि न भिन्नानि)। आङ्ग्लीयाः पार्श्वस्थं क्षेत्रं सुरक्षयितुम् इच्छन्ति स्म। विशेषतः यवनालयाः (मस्जिद इति) नाशिताः अथवा तेषां प्रयोगः पृथक्कार्याय कर्तुम् आरब्धवन्तः। उदाहरणार्थं जीनत-अल-मसजिद इति पर्युषरोटिकोद्योगगाररूपेण (ब्रैड कारखाना) परिवर्तितम्। जामा-यवनालये (जामा मस्जिद) पञ्चवर्षाणि यावत् कोऽपि प्रार्थनां(नमाज) न कर्तुं शक्नोति स्म। नगरस्य तृतीयांशः ध्वंसितः। कूल्यानां भेदनं कृत्वा ताः समतलाकाराः कृताः।

रेलवे इत्यस्य स्थानपनायै नगरस्य परिवेष्टनभित्तीनां (चारदीवारी) च विस्ताराय सप्तसप्तत्यधिकाष्टादशशततमे (१८७७) दशके शाहजहांनाबादस्य पश्चिमभित्तयः त्रोटिताः। अधुना आङ्ग्लीयाः उत्तरपक्षे विकसिते विशाले सिविल-लाइन्सक्षेत्रे वसितुम् आरब्धवन्तः। अधुना ते पुरातननगरेषु भारतीयैः सह न तिष्ठन्ति स्म। देहल्याः महाविद्यालयः(कालेज इति) विद्यालयरूपेण (स्कूल) परिवर्तितः सप्त-सप्तत्यधिकाष्टा-दश-शत-तमे वर्षे (१८७७) च तस्य पिधानं कृतम्।

**चित्रम् -७** जामामस्जिदतः दृष्टे सति। फेलिसबिएतोद्वारा आकृष्टं चित्रम्, १८५८-५९.

यवनालयं (मस्जिद इति) परितः निर्मितानि भवनानि पश्यन्तु। १८५७ तमवर्षीयात् विद्रोहात् परम् एतानि भवनानि स्वच्छीकृतानि



**चित्रम्-८** -पार्श्वस्थानां भवनानां पातनात् पश्चात् जामा-यवनालयस्य (जामा मस्जिद) दृश्यम्।

## ➤ गतिविधिः

सप्तमचित्रस्य अष्टमचित्रस्य च मध्ये परस्परं तुलनां कुर्वन्तु। एतयोः चित्रयोः मध्ये यत् पार्थक्यं दृश्यते तस्मात् अत्रत्यजनानाम् उपरि के प्रभावाः जाताः स्युः ?

## एकस्याः नूतनराजधान्याः योजना

आङ्ग्लीयाः देहल्याः साङ्केतिकस्य महत्त्वस्य विषये समीचीनतया जानन्ति स्म । परिमाणतः,सप्तपञ्चाशदधिकाष्टादशशततम-वर्षस्य (१८५७) विद्रोहात् परं ते बहूनि विशिष्टानि आयोजनानि अकुर्वन् । सप्तसप्तत्यधिकाष्टा-दश-शत-तमे वर्षे (१८७७) वायसरायलिटनः राज्ञी-विस्टोरियां भारतस्य सम्राज्ञीरूपेण घोषयितुं कस्याश्चित् राजसभायाः आयोजनं कृतम् । वस्तुतः तदानींकालं यावत् ब्रिटिशभारतस्य राजधानी अधुना अपि कलकत्तायाम् एव आसीत् परन्तु एतस्य विशालायाः राज-सभायाः आयोजनं देहल्यां कृतम् । एतस्य किं कारणं स्यात् ? विद्रोहकाले आङ्ग्लीयैः अवगतम् आसीत् यत् जनानां दृष्टौ अधुना अपि मुगलसम्राजः महत्त्वं वर्तते ते च तमेव स्वप्रमुखं मन्यन्ते । परिणामतः, ब्रिटिशजनैः मुगलसम्राजः सप्तपञ्चाशदधिकाष्टादश-शत-तम-वर्षस्य (१८५७) च विद्रोहिणां मुख्यकेन्द्रेषु सम्पूर्णेन चाकचक्येन प्रदर्शनं कृतम् ।



जार्जपञ्चमस्य राज्याभिषेक-राजसभा (कारोनेशन इति), १२ दिसम्बरमासः, १९११ तमवर्षम्,

एतस्यां राजसभायां लक्षाधिकभारतीयाः राजानः महाराजानः आङ्ग्लाधिकारिणः सैनिकाः च सङ्घीभूताः जाताः ।

एकादशाधिकैकोनविंशति-शत-तम-वर्षे (१९११) जार्जपञ्चमः इङ्ग्लैण्डस्य नृपः घोषितः, तस्मिन् अवसरे देहल्याम् एकस्याः राजसभायाः पुनः आयोजनं कृतम् । भारतस्य राजधानी कलकत्ता इति न भवेत् अपितु देहली भवेत् इति विषये निर्णयः घोषणा च अपि अभवत् यत् अधुना देहली भारतस्य राजधानी भविष्यति इति ।

तात्कालीन-नगरस्य दक्षिणभागे रायसीनोपत्यकायां दशवर्गमील-परिमिते स्थाने नवदेहल्याः निर्माणं कृतम् । एडवर्डलटयंसः हर्बर्टबेकरः च द्वौ वास्तुकारौ नवदेहल्याः तस्याः भवनानां च प्रारूप-निर्माण-कार्ये नियोजितौ । नवदेहली-स्थित-सर्वकारि-परिसरे मील-द्वय-परिमित-प्रथितः मार्गः, वायसरायस्य प्रासादं गन्तुं (वर्तमान-राष्ट्रपति

रायसीना पर्वतोपत्यकानां स्थितः वायस-रीगल-पैलेस इति (राष्ट्रपतिभवनम्) ।



भवनम् इति) मार्गः (वर्तमान-राजपथः), राजपथम् उभयतः सचिवालयस्य भवनानि निर्मितानि सन्ति। एतेषां सर्वकारिभवनानां संरचनायां भारतस्य राजेतिहासस्य(शाही इतिहास) पृथक् पृथक् कालस्य दिग्दर्शनं भवति स्म। पुनरपि एतस्य स्थूलरूपेण प्रारूपं क्लासिकी-यूनास्य (ख्रिस्ताब्दात् पूर्वं पञ्चमशताब्द्याः वास्तुशिल्पं तत्र दृश्यते। उदाहरणार्थं, वायस-राय-भवनस्य केन्द्रिय-गोलाकारछदिः (गुंबद) साञ्च्यां निर्मितस्य बौद्धस्तूपस्य एव आसीत्। तत्र रक्त-बभ्रू-पाषाणस्य चित्रित-जालानां च प्रेरणा मुग्लवास्तुशिल्पात् स्वीकृता आसीत्। परन्तु नूतनभवनेषु ब्रिटिशप्रभुत्वस्य किञ्चिद्दर्शनम् अपि आवश्यकम् आसीत्। अतः वासुकारैः अयं विषयः अपि मनसि धृतः यत् वायसरायस्य प्रासादः शाहजहांवर्यस्य जामा-यवनालयात् (जामा मस्जिद इति ) अपि उच्चतरः स्यात्!

इदं कार्यं कथं कर्तुं शक्यते स्म ?

नवदेहल्याः निर्माणे प्रायः विंशतिवर्षाणि अलगन्। शाहजहांना-बाद-सदृशं नगरं न स्यात् अपितु तस्मात् भिन्नं नगरं भवेत् इति संकल्पना आसीत्। तस्मिन् नगरे जनसम्मर्दयुक्तवस्तयः(भीड भरे मोहल्ले) संकीर्णविथयः च न भवेयुः इति प्रयासः आसीत्। नवदेहल्यां प्रथितानां सरलराजमार्गाणां विशाल-परिसराणां च मध्ये उन्नतानि भवनानि भवेयुः इति एतादृशी संकल्पना कृता आसीत्। पुरातन-देहल्याम् अव्यवस्था दृश्यते स्म। नूतननगरं स्वच्छं स्वस्थं च दृश्यते स्म। जनसम्मर्दयुक्तानि अस्वच्छानि च क्षेत्राणि स्वास्थ्याय समीचीनानि न सन्ति हानिकारक-रोगजनकानि च तानि भवन्ति इति आङ्ग्लीयाः चिन्तयन्ति स्म। अतः नवदेहल्यां समीचीन-जलापूर्त्तेः अवकरस्य च निकासाय नालिकानां सम्पूर्णां व्यवस्थां आङ्ग्लीयाः सज्जीकृतवन्तः। देहलीं च ते आधिक्येन हरितिमा-पूर्णाम् अकुर्वन्। तत्र वृक्षयुक्तानि दीर्घाणि उद्यानानि चापि निर्मितानि तस्मात् च निरन्तरं शुद्धवायोः ओषजनस्य (आक्सीजन) च प्राप्तिः भवेत्।

स्रोतः-३-

### नवदेहल्याः संकल्पना

किमर्थं वायसराय-हार्डिंगः देहलीं भारतस्य राजधानीरूपेण अचिनोत् ? इति तत्र कारणं तेन उक्तम्-

इदं परिवर्तनं भारतीयजनानां कल्पनानुरूपं भविष्यति.....तथा च सर्वे जनाः भारते ब्रिटिशशासनं भवेत् इति दिशि अदम्यस्य संकल्पस्य रूपेण एतस्य कार्यस्य प्रशंसां करिष्यन्ति।

वास्तुकारस्य हर्बटबेकरस्य दृष्टौ ....

नवराजधानी सुशासनस्य ऐक्यस्य च प्रतीकभूता भवेत् इति ब्रिटिशशासनस्य अन्तर्गतं भारतस्य इतिहासे काचित् नूतना घटना अस्ति। भारते ब्रिटिशशासनं केवलं शासनस्य संस्कृत्तेः च कस्यचित् तलस्य इव नास्ति। इयं काचित् विकाशशीला सभ्यता अस्ति, एतस्यां पूर्वस्य पश्चिमस्य च श्रेष्ठतत्त्वानां मिश्रणम् अस्ति---। देहल्याः वास्तुशिल्पे एतस्य महतः तथ्यस्य दर्शनं स्यात्। (२अक्टूबरमासः,१९१२तमवर्षम्)

**➤ गतिविधिः**

कल्पयन्तु,भवन्तः राष्ट्रपतिभवनं पश्यन्तः रायसीना-पर्वतोपत्यकां प्रति गच्छन्ति। किं बेकरमहोदयः इव भवन्तः अपि इत्थम् अनुभवन्ति यत् एतस्मिन् भवने दृष्टे सति एतस्य भव्यतायाः ब्रिटिशसत्तायाः शक्तेः च बोधः भवति।

**➤ गतिविधिः**

किं भवन्तः एतस्मिन् अध्याये द्वे उदाहरणे अन्वेष्टुं शक्नुवन्ति याभ्याम् अवगम्यते यत् राजधान्याः छविविषये किञ्चित् पृथक् चिन्तनम् अपि विद्यमानम् आसीत्।

## विभाजनकालिकं जीवनम्

सप्तचत्वारिंशदधिकैकोन-विंशति-तमे वर्षे (१९४७) भारतस्य विभाजनेन नूतनसीमां परितः जनसंख्या व्यापकसंख्यायां विस्थापिता। परिणामतः देहल्याः जनसंख्या वर्धिता। आजीविकायाः साधनानि परिवर्तितानि। नगरस्य च संस्कृतिः सर्वथा पृथक् जाता।

स्वतन्त्रतायाः विभाजनस्य च केभ्यश्चित् एव दिनेभ्यः पश्चात् उपद्रवाः प्रारब्धाः। देहल्यां सहस्राधिकाः जनाः हताः तेषां जनानां च गृहाणि विलुण्ठ्य भस्मसात्कृतानि। देहलीतः ये मुस्लिमजनाः पाकिस्तानम् अगच्छन् तेषां मुस्लिमजनानां स्थानं पाकिस्तानतः आगतैः सिक्खजनैः हिन्दुशरणार्थिभिः च अधिकृतम्। शाहजहांनाबादे स्वामिरहितानां भवनानां अधिग्रहणाय शरणार्थिनां समूहाः परिभ्रमितुम् अन्वेष्टुं च आरब्धवन्तः। विविधप्रकारेण मुस्लिमजनान् तेषां सम्पत्तीः विक्रेणाय पलायितुं चापि तान् बाध्यान् अकुर्वन्। देहल्याः द्वित्रांश-मुस्लिमजनाः पलायितवन्तः तस्मात् तत्र चतुश्चत्वारिंशत्सहस्रं गृहाणि रिक्तानि जातानि। अनेके मुस्लिमजनाः पाकिस्तानं गन्तुं यानप्रतीक्षायाम् अस्थिरशिविरेषु निवसितुम् आरब्धवन्तः।

तस्मिन् काले देहली शरणार्थिनगररूपा अजायत। देहल्याः जनसंख्यायां प्रायः पञ्च लक्षं जनानां वर्धनम् अभवत्। (अपरञ्च १९५१ तमवर्षे अत्रत्या जनसंख्या अष्टौ लक्षतः किञ्चिदधिका आसीत्।) प्रायः अधिकाः जनाः पञ्चनदप्रान्ततः आगतवन्तः आसन्। ते शिविरेषु विद्यालयेषु सैन्यस्थलेषु उद्यानेषु च आगत्य वसितुम् आरब्धवन्तः। तेषु केचन जनाः रिक्तगृहाणि अधिग्रहीतुम् (कब्जा) अवसरं प्राप्तवन्तः। अनेके जनाः शरणार्थिवस्तिषु उषितवन्तः। लाजपतनगर-तिलकनगर-सदृशवस्तयः तस्मिन् काले एव स्वरूपं प्राप्तवत्यः। देहलीम् आगन्तुकानां सौविध्याय नित्योपयोगि-वस्तूनाम् आपूर्तये च अत्र हट्टाः महाहट्टाः च उद्घाटिताः। अनेके नूतनाः विद्यालयाः महाविद्यालयाः चापि उद्घाटिताः।

ये जनाः इतः अगच्छन् तेषां स्थाने आगतानां शरणार्थिनां निपुणता उद्योगाः कार्याणि च सर्वथा पृथक् आसन् इति। ये मुस्लिमजनाः इतः पाकिस्तानम् अगच्छन् तेषु बहवः शिल्पिनः लघुव्यापारिणः श्रमिकाः च आसन्। देहलीं ये आगताः नूतनाः जनाः ग्रामीणभूस्वामिनः, अधिवक्तारः, शिक्षकाः वणिजः आपणिकाः च आसन्। विभाजनस्य कारणात् तेषां जीवनं उद्योगाः चापि परिवर्तिताः। जङ्गमापणिकाः काष्ठकाराणां लौहकाराणां च रूपेण अत्र आजीविकाम् आरब्धवन्तः। बहवः जनाः एतेषु उद्योगेषु साफल्यम् अपि प्राप्तवन्तः।

**चित्रम्-११** विभाजनात् पश्चात् सहस्राधिकाः जनाः देहल्यां निर्मितेषु शरणार्थिशिविरेषु अवसन्।



पञ्चनदप्रान्ततः आगतैः विशाल-जन-सङ्घैः देहल्याः सामाजिकपरिवेशः सर्वथाः परिवर्तितः। भोजनस्य कलायाः वेशभूषायाः अथवा परिधानस्य च क्षेत्रे परिवर्तनानि जातानि, मुख्यतया तत्र उर्दू-आधारिता नगरीया संस्कृतिः नूतनरुचीनां संवेदन-शीलतानां च कारणात् अभिभवं प्राप्तवती।

### पुरातननगराणाम् अन्तः

एतस्मिन् कालाभ्यन्तरे पुरातनस्य नगरस्य अर्थात् शाहजहां-नाबादस्य किम् अभवत्? अतीते मुगलकालस्य प्रसिद्धकूल्याभ्यः

गृहेषु पानीयं जलम् एव न आगच्छति स्म अपरञ्च अन्याभ्यः गृह्यावश्यकताभ्यः अपि जलं लभ्यते स्म। एकोनविंशतिशताब्द्यां जलापूर्त्तेः निष्कासस्य च समीचीनतमा व्यवस्था आसीत् परन्तु तस्याः अवहेलनं प्रारब्धम्। कूपानां वापीनां च अव्यवस्था जाता। गृह्यावकरस्य निष्कासाय याः धाराः कुल्याः च आसन् ताः अपि क्षतिग्रस्ताः अभवन्। एषा स्थितिः तदानीन्तनस्य कालस्य अस्ति यदा नगरस्य जनसंख्या निरन्तरं वर्धते स्म।

जीर्णाः भग्नाः च कुल्याः तीव्रतया वर्धमानायाः जनसंख्यायाः आवश्यकताः न पूरयितुं शक्नुवन्ति स्म। एकोनविंशतिशताब्द्याः अन्ते शाहजहांद्वारा निर्मापिताः नालिकाः पिहिताः तथा च मुक्तनालिकानां नूतनव्यवस्था विकासम् आनीता। शीघ्रमेव एषा प्रणाली अपि अतिभारेण अव्यवस्थां गता। अनेके धनाढ्याः जनाः राजमार्गस्य प्रान्तभागेषु प्रवहन्तिभिः नालिकाभिः मुक्ताभिः मलमूत्रपूरित-नालिभिः बाधां च अनुभवन्ति स्म। देहली-नगर-निगम-परिषद् सुनिष्कास-व्यवस्थायाः उपरि धनं व्ययीकर्तुं सज्जा न आसीत्। तथापि, तस्मिन् काले नूतनदेहल्याः क्षेत्रेषु निष्कास-व्यवस्थायाः उपरि लक्षाधिकरूप्यकाणि व्ययीकृतानि।



**चित्रम्-१२** देहल्यां निजामुद्दीन-औलियावर्यस्य स्मारकस्थलस्य समीपे निर्मिता काचित् प्रसिद्धा वापी।

## राजप्रासादानां पतनम्

सप्तदशाष्टादशशताब्दयोः मुगल-कुलीन-वर्गीयाः जनाः रम्येषु राजप्रासादेषु निवसन्ति स्म। एकोनविंशति-शताब्दस्य मध्यकालस्य चित्रे दृष्टे सति एतादृशाः न्यूनातिन्यूनाः शतं राजप्रसादाः दृश्यन्ते। अलिन्दयुक्तानि(दालान) जल-प्रपात-युक्तानि च भव्यभवनानि आसन्।

**चित्रम् -१३** एकोनविंशतिशताब्दस्य उत्तरार्द्धे देहल्याः चान्दनीचौक इति।



> **गतिविधिः**
>
> द्वयोः बालयोः कल्पनां कुर्वन्तु। तयोः एकः प्रासादे (हवेली) निवसति अपरः च औपनिवेशिके भवने। स्वकुटुम्बेन सह तयोः सम्बन्धेषु का भिन्नता भविष्यति? भवन्तः कस्य बालकस्य इव जीवितुम् एषिष्यन्ति? स्वसहपाठिभिः सह निजपरामर्शस्य विषये चर्चयन्तु अपि च तान् सूचयन्तु यत् भवता कथं एतस्य चयनं कृतम्? इति।

एकस्मिन् प्रासादे (हवेली इति) अनेके कटुम्बाः निवसन्ति स्म। सुन्देरण मुख्यद्वारेण प्रविष्टे सति प्रासादाभ्यन्तरे (हवेली इति) भवन्तः एकस्मिन् मुक्ते प्राङ्गणे (अहाते में) प्राप्नुवन्ति स्म। प्राङ्गणं परितः अतिथीनां वणिजां च कृते सार्वजनिकप्रकोष्ठाः भवन्ति स्म येषां प्रयोगं केवलं पुरुषाः एव कुर्वन्ति स्म। आन्तरिकाः आलिन्दाः प्रकोष्ठाः च कुटुम्बस्य महिलानां प्रयोगाय भवन्ति स्म। प्रासादस्थानां प्रकोष्ठानां प्रयोगः विविधेभ्यः कार्येभ्यः भवति स्म। तेषु प्रकोष्ठेषु पीठोपकरणानि अथवा उपस्कराणि (फर्नीचर इति ) न्यूनानि भवन्ति स्म।

एकोनविंशति-शताब्दस्य मध्यकालं यावत् अपि कमर-अल-दीन-खानस्य प्रासादे (हवेली) अनेकानि भवनानि आसन्। तेषु वाहनचालकानां वस्त्र-मण्डप-कर्मकराणाम्(डेरवाल) उल्काधारिणां लेखाधिकारिणां लिपिकापानां सेवकानां च कृते वासव्यवस्था आसीत्।

अनेके मुगलजनाः सम्पन्न-ब्रिटि-शासनस्य काले एतानि विशालानि भवनानि संरक्षयितुं समर्थाः न आसन्। परिणामतः, प्रासादानां(हवेलियां) वण्टनम् आरब्धम्। तेषां प्रासादानां पृथक् पृथक् भागाः विक्रेतुम् आरब्धाः। प्रासादानां यानि द्वाराणि राजमार्गस्य समक्षे आसन् तत्र आपणाः भाण्डागाराणि (गोदाम) जातानि। अनेके प्रसादाः नूतनस्य वणिग्वर्गस्य नियन्त्रणे जाताः। अनेके प्रसादाः अनूपयोगत्वात् नष्टाः जाताः।

सम्पन्नः (अमीर) - कुलीनवर्गीयः जनः

औपनिवेशिकानि ब्रिटिशभवनानि प्रासादेभ्यः सर्वथा पृथक् आसन्। एतानि ब्रिटिशभवनानि एकलकुटुम्बाय निर्मितानि आसन्। अतः तादृशानि भवनानि एकतलयुक्तानि नम्री-भूतानि छदियुक्तानि च भवनानि भवन्ति स्म। एतानि ब्रिटिश-भवनानि सामान्यतया एक-एकड-परिमिते अथवा एकड-द्वयपरिमिते मुक्ते स्थाने भवन्ति स्म। एतेषु भवनेषु भोजनाय शयनाय वासाय च पृथक् पृथक् प्रकोष्ठाः आसन्। अग्रिमे भागे लम्बमानाः आलिन्दः भवन्ति स्म। अनेकेषु भवनेषु त्रिषु स्थानेषु अलिन्दाः निर्मीयन्ते स्म। पाकशाला, अश्वशाला, सेवकानाम् आवासाः च मुख्यभवनतः पृथक् निर्मीयन्ते स्म। गृहस्य सुरक्षार्थं द्वादशाधिकाः सेवकाः भवन्ति स्म। कुटुम्बस्य महिलाः प्रायः सौचिकानाम् अन्येषां च शिल्पिनां निरीक्षणाय आलिन्दे उपविशन्ति स्म।

## नगरपालिका योजनां निर्माति –

एकत्रिंशदधिकैकोनविंशति-शत-तम-वर्षस्य (१९३१) जनगणनाद्वारा ज्ञायते यत् पुरातन-नगरीये क्षेत्रे भयानकः जनसम्मर्दः अस्ति। अत्र प्रत्येकं परिमितस्थानं नवतिः जनाः निवसन्ति स्म अपरञ्च नवदेहल्यां प्रत्येकडभूमिं केवलं त्रयः जनाः निवसन्ति स्म।



**चित्रम्-१४** नवदेहल्याः एकम् औपनिवेशिक-भवनम्।

पुरातननगरे अव्यवस्था जाता पुनरपि तत्र तस्य विस्तारः निरन्तम् अभवत् । पुरातननगरस्य निवासिभ्यः राबर्टक्लार्कः १८८८ तमवर्षे लाहौरगेट-संशोधन-योजनायाः अन्तर्गतं कामपि विस्तारयोजनाम् आरब्धवान् । तस्य चिन्तनम् इदम् आसीत् यत् अत्रत्य-वास्तव्याः पुरातननगरतः पृथक् भूत्वा नूतनप्रकारस्य चौराहा-विपण्यां प्रति गच्छेयुः । एतं चतुष्पथं (चौराहे इति) परितः आपणाः भवेयुः इति कल्पना तस्य आसीत् । एतस्मिन् पुनर्विकासक्रमे राजमार्गेभ्यः जालयुक्तसंरचना सुनिश्चिता । अधुना राजमार्गाणां प्रथिमा आकारः स्वरूपः च सदृशः स्यात् इत्येतत् कार्यं करणीयम् आसीत्। वस्तीनां निर्माणाय भूमिः समानखण्डेषु विभक्ताः । एतस्य नूतनस्थानस्य नाम क्लार्कगञ्ज इति स्थापितम् । इदं कार्यं न कदापि पूर्तिम् अगात् । तेन च पुरातननगरस्य जनसम्मर्दः अपि न कथमपि न्यूनीकृतम् । १९१२ तमवर्षे अपि एतेषु नूतनस्थानेषु जलापूर्तेः निष्कासस्य च व्यवस्था अतिदयनीया आसीत्।




**चित्रम् -१५** पुरातन-देहल्याः कश्चित् राजमार्गः ।

देहली-संशोधन-न्यासस्य (ट्रस्ट इति) घटनं १९३६ तमवर्षे अभवत् । एतस्याः योजनायाः अन्तर्गतं सम्पन्नजनेभ्यः दरियागञ्ज-दक्षिण-सदृशानि क्षेत्राणि निर्मितानि । अत्र उद्यानानि परितः वस्तयः जाताः । भवनानाम् अन्तः निजतायाः नूतनचिन्तनस्य च दृष्ट्या स्थानं विभक्तम् आसीत्। अधुना अनेके कुटुम्बाः अथवा समूहाः सामूहिक-स्थाने न निवसन्ति स्म अपितु भवनस्य अन्तः एकस्य एव कुटुम्बस्य विभिन्नेभ्यः सदस्येभ्यः पृथक् पृथक् स्थानानि भवन्ति स्म ।

## अन्यत्र –

### दक्षिण-अफ्रीकायां हर्बर्टबेकरः

यदि भवन्तः षोड्शं सप्तदशं च चित्रं पश्यन्ति तर्हि तेन अवगमिष्यन्ति यत् एतयोः द्वयोः भवनयोः महती समानता अस्ति। परन्तु एते द्वे भवने सर्वथा पृथक् पृथक् महाद्वीपानां स्तः। अस्मात् तथ्यात् भवन्तः किम् अवगच्छन्ति ?



चित्रम्-१६



चित्रम्-१७

नवत्यधिकैकोन-विंशत्यधिकाष्टा-दश-शत-तमस्य (१८९०) दशकस्य आरम्भे एव हर्बर्टबेकरनाम्नः कश्चित् युवाङ्ग्लीय-वास्तुकारः कार्यम् अन्वेषयन् दक्षिणाफ्रीकां प्राप्तवान्। अत्र बेकरस्य मेलनं केपटाउनस्य राज्यपालेन (गवर्नरेण इति) सेसिलरोड्स-वर्येन सह अभवत् तस्मात् तेन बेकरस्य आभ्यन्तरे ब्रिटिशसाम्राज्यं प्रति स्नेहः प्राचीनरोमनवास्तुशिल्पं च प्रति प्रशंसायाः भावः उत्पादितः।

१७ चित्रे दक्षिणाफ्रीकास्थितस्य प्रिटोरियानगरस्य अर्थात् संघीयभवनं (यूनियनबिल्डिंग इति ) दृश्यते। यस्य प्रारूपं बेकरः एव सज्जीकृतवान् आसीत्। एतस्मिन् प्राचीनस्य प्रतिष्ठितस्य च वास्तुशिल्पस्य तत्त्वानां प्रयोगः कृतः आसीत्, येषां प्रयोगः बेकरेण अपि नवदेहलीस्थितस्य सचिवालयभवनस्य योजनायाम् अपि कृतः अस्ति। यूनियनबिल्डिंगः इति अपि नवदेहलीस्थितस्य सचिवालयभवनस्य इव पर्वते स्थितम् आसीत्। किं भवद्भिः ध्यातं यत् सत्तासीनाः जनाः अधस्तात् दर्शनस्य स्थाने उपरिष्ठात् अधोभागं प्रति द्रष्टुम् इच्छन्ति स्म ? यूनियनभवनं सचिवालयभवनं च द्वे अपि राजकार्यालयाणां कृते निर्मिते आस्ताम्।

### आगच्छन्तु कल्पयन्तु

मन्यन्तां, भवन्तः १७००तमवर्षे समया शाहजहांनाबादे निवसन्ति। एतस्मिन् अध्याये प्रदत्तानां सूचनानाम् आधारेण तात्कालिकस्य जीवनस्य कस्यचित् एकस्य दिनस्य स्वानुभवं लिखन्तु।

## पुनः स्मरन्तु –

१. उचितम् अनुचितं च ज्ञापयन्तु –

(क) पश्चिमविश्वे आधुनिकनगराणि औद्योगिकीकरणेन सह विकसितानि।

(ख) सूरतस्य मछलीपट्नमस्य एकोनविंशतितमे शताब्दे विकासः अभवत्।

(ग) विंशतिशताब्दे भारतस्य अधिकांशजनसंख्या नगरेषु निवसति स्म।

(घ) १८५७ तमवर्षात् पश्चात् जामायवनालये (जामा-मस्जिदे) इति पञ्च वर्षाणि यावत् यवनप्रार्थना (नमाज इति ) न अभवत्।

(ङ) नवदेहल्याः अपेक्षया पुरातनदेहल्याः स्वच्छताविषये अधिकधनस्य व्ययः कृतः।

२. रिक्तस्थानानि पूरयन्तु –

क) सफलतापूर्वकस्य गुम्बदस्य प्रयोगः यत्र अभवत् तत् प्रथमभवनं------आसीत्।

ख) नवदेहल्याः शाहजहांनाबादस्य च रूपरेखां सुनिश्चेतुं द्वौ वास्तुकारौ---- च ---- आस्ताम्।

ग) आङ्ग्लीयाः जनसम्मर्दयुक्तानि स्थानानि परित्यज्य---मन्यन्ते स्म।

घ) ......इत्यस्य नाम्नः १८८८ तमवर्षे काचित् विस्तारयोजना सज्जीकृता।

३. नवदेहल्याः शाहजहांनाबादस्य च नगरयोजनायां तिस्रः भिन्नताः अन्वेषयन्तु।

४. मद्राससदृशनगराणां "गोरे" अर्थात् श्वेत-क्षेत्रेषु के जनाः निवसन्ति स्म ?

## आगच्छन्तु विचारयामः-

५. विनगरीकरणस्य (विशहरीकरणस्य) कः अभिप्रायः अस्ति ?

६. आङ्ग्लीयैः देहल्याम् एव विशालराजसभा किमर्थम् आयोजिता यद्यपि देहली राजधानी नासीत्।

७. पुरातन-देहली-नगरं ब्रिटिशशासनस्य अन्तर्गतं कथं क्रमशः परिवर्तितम् ?

८. विभाजनेन देहल्याः जनजीवने कः प्रभावः निपतितः ?

## आगच्छन्तु कृत्वा पश्यामः

९. स्वनगरस्य अथवा स्वपार्श्वस्थ- नगरस्य इतिहास-विषये अवजानन्तु । पश्यन्तु तत् कदा कथं च विस्तारं प्राप्तवत् अपि च कालक्रमेण तत्र कानि कानि परिवर्तनानि अभवन् । भवन्तः विपणीनां भवनानां सांस्कृतिक-संस्थानानां वस्तीनां च इतिहासविषयकीं सूचनां दातुं शक्नुवन्ति।

१०. स्वनगरस्य उपनगरस्य ग्रामस्य न्यूनातिन्यूनं दशोद्यागानां (व्यवसाय) सूचीं निर्मान्तु । अवजानन्तु यत् एते उद्योगाः कदारभ्य तत्र क्रियन्ते । अनया सूच्या एतस्मिन् क्षेत्रे जातपरिवर्तनानां विषये किम् अवगम्यते ?

इति षष्ठोऽध्यायः